श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ षट्पञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षट्पञ्चाशः सर्गः ॥

## सम्पातेर्वानराणां भयं तेषां मुखाजटायुषो वधं निशम्य सम्पातेर्दुःखं स्वमधोऽवरोपयितुं तस्य वानरान् प्रत्यनुनयः

उपविष्टास्तु ते सर्वे यस्मिन् प्रायं गिरिस्थले।
हरयो गृध्रराजश्च तं देशमुपचक्रमे॥ **4.56.1** ॥

सम्पातिर्नाम नाम्ना तु चिरजीवी विहङ्गमः।
भ्राता जटायुषः श्रीमान् विख्यातबलपौरुषः॥ **4.56.2** ॥

कन्दरादभिनिष्क्रम्य स विन्ध्यस्य महागिरेः।
उपविष्टान् हरीन् दृष्ट्वा हृष्टात्मा गिरमब्रवीत्॥ **4.56.3** ॥

विधिः किल नरं लोके विधानेनानुवर्तते।
यथायं विहितो भक्ष्यश्चिरान्मह्यमुपागतः॥ **4.56.4** ॥

परम्पराणां भक्षिष्ये वानराणां मृतं मृतम्।
उवाचैतद् वचः पक्षी तान् निरीक्ष्य प्लवङ्गमान्॥ **4.56.5** ॥

तस्य तद् वचनं श्रुत्वा भक्ष्यलुब्धस्य पक्षिणः।
अङ्गदः परमायस्तो हनूमन्तमथाब्रवीत्॥ **4.56.6** ॥

पश्य सीतापदेशेन साक्षाद् वैवस्वतो यमः।
इमं देशमनुप्राप्तो वानराणां विपत्तये॥ **4.56.7** ॥

रामस्य न कृतं कार्यं न कृतं राजशासनम्।
हरीणामियमज्ञाता विपत्तिः सहसाऽऽगता॥ **4.56.8** ॥

वैदेह्याः प्रियकामेन कृतं कर्म जटायुषा।
गृध्रराजेन यत् तत्र श्रुतं वस्तदशेषतः॥ **4.56.9** ॥

तथा सर्वाणि भूतानि तिर्यग्योनिगतान्यपि।
प्रियं कुर्वन्ति रामस्य त्यक्त्वा प्राणान् यथा वयम्॥ **4.56.10** ॥

अन्योन्यमुपकुर्वन्ति स्नेहकारुण्ययन्त्रिताः।
ततस्तस्योपकारार्थं त्यजतात्मानमात्मना॥ **4.56.11** ॥

प्रियं कृतं हि रामस्य धर्मज्ञेन जटायुषा।
राघवार्थे परिश्रान्ता वयं सन्त्यक्तजीविताः॥ **4.56.12** ॥

कान्ताराणि प्रपन्नाः स्म न च पश्याम मैथिलीम्।
स सुखी गृध्रराजस्तु रावणेन हतो रणे।
मुक्तश्च सुग्रीवभयाद् गतश्च परमां गतिम्॥ **4.56.13** ॥

जटायुषो विनाशेन राज्ञो दशरथस्य च।
हरणेन च वैदेह्याः संशयं हरयो गताः॥ **4.56.14** ॥

रामलक्ष्मणयोर्वासमरण्ये सह सीतया।
राघवस्य च बाणेन वालिनश्च तथा वधः॥ **4.56.15** ॥

रामकोपादशेषाणां रक्षसां च तथा वधम्।
कैकेय्या वरदानेन इदं च विकृतं कृतम्॥ **4.56.16** ॥

तदसुखमनुकीर्तितं वचो
भुवि पतितांश्च निरीक्ष्य वानरान्।

भृशचकितमतिर्महामतिः
कृपणमुदाहृतवान् स गृध्रराट् ॥ **4.56.17** ॥

तत् तु श्रुत्वा तथा वाक्यमङ्गदस्य मुखोद्गतम्।
अब्रवीद् वचनं गृध्रस्तीक्ष्णतुण्डो महास्वनः ॥ **4.56.18** ॥

कोऽयं गिरा घोषयति प्राणैः प्रियतरस्य मे।
जटायुषो वधं भ्रातुः कम्पयन्निव मे मनः ॥ **4.56.19** ॥

कथमासीजनस्थाने युद्धं राक्षसगृध्रयोः।
नामधेयमिदं भ्रातुश्चिरस्याद्य मया श्रुतम् ॥ **4.56.20** ॥

इच्छेयं गिरिदुर्गाच्च भवद्भिरवतारितुम्।
यवीयसो गुणज्ञस्य श्लाघनीयस्य विक्रमैः ॥ **4.56.21** ॥

अतिदीर्घस्य कालस्य परितुष्टोऽस्मि कीर्तनात्।
तदिच्छेयमहं श्रोतुं विनाशं वानरर्षभाः ॥ **4.56.22** ॥

भ्रातुर्जटायुषस्तस्य जनस्थाननिवासिनः।
तस्यैव च मम भ्रातुः सखा दशरथः कथम् ॥ **4.56.23** ॥

यस्य रामः प्रियः पुत्रो ज्येष्ठो गुरुजनप्रियः।
सूर्यांशुदग्धपक्षत्वान्न शक्नोमि विसर्पितुम्।
इच्छेयं पर्वतादस्मादवतर्तुमरिन्दमाः ॥ **4.56.24** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे षट्पञ्चाशः सर्गः ॥